National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 255-258
© 2025 NJHSR
www.sanskritarticle.com

**Snigdha Dhar**
Research Scholar,
Dept. of Education,
Central Sanskrit University,
Ekalavya Campus, Agartala

**Correspondence:**
**Snigdha Dhar**
Research Scholar,
Dept. of Education,
Central Sanskrit University,
Ekalavya Campus, Agartala

# त्रिपुराराज्यस्य उच्चमाध्यमिकाध्यापकानां मूल्यशिक्षावधारणायाः सर्वेक्षणात्मकमध्ययनम्

**स्निग्धा धर**

**सारांश (Abstract)**

मूल्यशिक्षायाः महत्त्वं कस्यापि समाजस्य राष्ट्रस्य च स्थिरतायै, सामाजिकसौहार्दाय, सांस्कृतिकविकासाय च अत्यन्तं महत्त्वपूर्णम् अस्ति। छात्राणां नैतिकं, सामाजिकं, मानसिकं च विकासं सुनिश्चितं करोति इति शिक्षायाः अभिन्नः भागः अस्ति। मूल्यशिक्षा न केवलं व्यक्तिगतविकासाय अपितु समाजे सकारात्मकपरिवर्तनार्थमपि आवश्यकम्। मूल्यशिक्षा न केवलं नैतिकसामाजिकमूल्यानि प्रवर्तयति अपितु छात्राणां कृते उचित-अनुचितयोः भेदम् अवगन्तुं क्षमता अपि प्रदाति। त्रिपुराराज्ये उच्चमाध्यमिकशिक्षास्तरस्य मूल्यशिक्षायाः प्रभावः, तस्याः अवधारणायाः व्याख्या च अद्यतनशिक्षादृष्टिकोणे अत्यन्तम् आवश्यकः अस्ति। त्रिपुराराज्ये उच्चमाध्यमिकशिक्षकाणां मूल्यशिक्षणविषये अवगमनस्य धारणानां च सर्वेक्षणस्य निष्कर्षः प्रतिपादितः। सर्वेक्षणस्य उद्देश्यम् अस्ति यत् शिक्षकाः अस्य महत्ताविषये कथं जागरूकाः सन्ति, तथा च ते स्वपाठ्यक्रमे कक्षासु च मूल्यशिक्षणं कथं क्रियान्वयनं कुर्वन्तः सन्ति इति। कृतस्य सर्वेक्षणस्य निष्कर्षाः न केवलं राज्यस्य शिक्षाव्यवस्थायाः विकासे सहायकाः भविष्यन्ति अपितु मूल्यशिक्षायाः अधिकप्रभाविरूपेण **अध्ययने स्वीकृतानि सप्ततिः मूल्यनि** कार्यान्वियनस्य दिशि मार्गदर्शनं अपि प्रदास्यन्ति। अध्ययनेन ज्ञातं यत् मूल्यशिक्षायाः सैद्धान्तिकावधारणायां शिक्षकाः स्वमूल्यानि च सुष्ठु अभिजानन्ति। परन्तु आर्थिक-सौन्दर्य-सामाजिक-राजनैतिक-धार्मिक-अवधारणायाः तथा शिक्षकाणां मूल्यानां मध्ये सम्बन्धः तावान् सकारात्मकः न दृष्टः।

**प्रधानसंसूचकानि –** मूल्यशिक्षा, मूल्यानां प्रकृतिः, अध्ययने स्वीकृतानि मूल्यनि, मूल्यशिक्षाधारित श्लोकाः, अध्ययनस्य उद्देश्यानि, प्राक्कल्पना, विधिः, चराः, न्यादर्शः, उपकरणानि, अध्ययनप्रक्रिया, दत्तांशस्य विश्लेषणम्, निष्कर्षः।

## भूमिका-

मूल्यशिक्षा शिक्षायाः महत्त्वपूर्णः भागः अस्ति, यः व्यक्तित्वस्य समग्रविकासे महत्त्वपूर्णां भूमिकां निर्वहति। शिक्षाप्रक्रियायां मूल्यशिक्षायाः विशेषस्थानं दत्तम् अस्ति। मूल्यशिक्षायाः उद्देश्यं छात्रान् जीवनस्य उच्चतमानां आदर्शानां नैतिकसिद्धान्तानां च विषये अवगमयति, येन ते समाजस्य उत्तमाः नागरिकाः भवितुम् अर्हन्ति। अस्मिन् अध्ययने ज्ञातुं प्रयत्नः विहितः यत् शिक्षकाः स्वपाठ्यक्रमे मूल्यशिक्षां समाकलयन्ति वा, मूल्यानि शिक्षणे प्रभावीरूपेण कार्यान्वितानि वा इति। तदतिरिक्तं छात्राणां मध्ये जागरूकताम् आनेतुं शिक्षकाः मूल्यशिक्षायाः उपयोगं कथं कुर्वन्ति इति द्रष्टुं अपि प्रयासः विहितः।

### *मूल्यशिक्षा –*

मूल्यशिक्षा शिक्षायाः सः भागः अस्ति यः नैतिकमूल्यानाम्, मानदण्डानाम्, कौशलानां, स्वभावस्य च विकासे केन्द्रितः भवति ये छात्राणां समग्रविकासे सहायकाः भवन्ति । मूल्यशिक्षा अस्मान् दया, सत्यम्,

सहयोगः, परोपकारः इत्यादीनि तत्त्वानि शिक्षयति। मूल्यशिक्षा चरित्रविकासे, व्यक्तित्वविकासे, आध्यात्मिकविकासे च सहायकं भवति ।

**मूल्यानां प्रकृतिः-**

मूल्यं मानवस्य कश्चन विश्वासो भवति, यदाधारीकृत्य वरीयतानुगुणं कार्ये सामर्थ्यमागच्छति। मूल्यस्य प्रकृतिविषये त्रिध प्रतिपादनं प्राप्यते।

**१. आत्मनिष्ठम्** (Subjective)

अस्यां विचारधारायां मूल्यमात्मनिष्ठं व्यक्तिनिष्ठाभवति अर्थात् व्यक्ति रुचिः, अरुचिः, संतोषः, असंतोषः, इच्छ, अनिष्ठा इत्यादनुगुणं मूल्यानां निर्धारणं भवति अर्थात् मूल्यानि तानि भवन्ति व्यक्तिं संतोषयन्ति। (Values ae that which sutisfor develop)

**२. वस्तुनिष्ठम्** (Objective)

अस्यां विचारधारायां मूल्यं व्यक्तिनिष्ठं न भवति अपि तु मूल्यं स्वतन्त्रं सम्पत्ययत्वेनाङ्गीक्रियते, यस्य प्रादभ्यर्थं व्यक्तिभि प्रयासो अपेक्ष्यते, तस्माच्च मूल्यानि वस्तुनिष्ठानि। वस्तुनिष्ठे इति स्वीकारे काश्चन व्यक्तयः इमानि मूल्यानि प्राप्नुवन्ति काश्चन न प्राप्नुवन्ति ।

**३. सहसम्बन्धः** (Relationistic)

अस्यां विचारधारायां मूल्यनि न तु व्यक्तिनिष्ठानि, न वा वस्तुनिष्ठानि, न च एतद् व्यतिरिक्तानि । एतेषां मूल्यानां प्रास्यर्थं वातावरणस्य निर्माणमपेक्ष्यते। इमानि भावतर्कविशिष्टानि भवन्ति ।

**अध्ययने स्वीकृतानि मूल्यनि-**

अस्मिन् शोधकार्ये सप्ततिः मूल्यानि स्वीकृतानि तत्रापि शोधकर्ता पड्विभागाः कृताः तेष्वेव षड्विभागेषु सप्ततिः मूल्यानि अन्तर्भावितानि। यथा-

**१. सैद्धान्तिकमूल्यम्**

अस्मिन् मूल्ये षट्त्रिंशत् मूल्यानि स्थापितानि यथा - १. आज्ञापालनम्, २. शिष्टाचारः, ३. नियमितता, ४. समयस्य सदुपयोगः, ५. समयनिष्ठा, ६. स्वावलम्बनम्, ७. स्वाध्यायः, ८. सहभावना, ९. सहयोगः, १०. निष्कपटता, ११. सदाचरणम्, १२. सदाशयता, १३. कर्तव्यभावना, १४. ईमानदारी, १५. कृतज्ञता, १६. परिचन्ता, १७. परावधानम्, १८. आत्मनिर्भरता, १९. स्वसहायता, २०. सहसः, २१. नेतृत्वम्, २२. पूर्वाभिभाषी, २३. आत्मविश्वासः, २४. सत्यम्, २५. अहिंसा, २६. शान्तिः, २७. जिज्ञासा, २८. ज्ञानान्वेषणम्, २९. कर्तव्याकर्तव्ययोः भेदः, ३०. संयमः, ३१. अनुशासनम्, ३२. सहनशीलता, ३३. आत्मनियंत्रणम्, ३४. स्वानुशासनम्, ३५. स्वसम्मानम्, ३६. व्यक्तिप्रतिष्ठा।

**२. सौन्दर्यात्मकम् मूल्यम् -**

**सहनशीलता, ३३. आत्मनियंत्रणम्, ३४. स्वानुशासनम्, ३५. स्वसम्मानम्, ३६. व्यक्तिप्रतिष्ठा।**

**२. सौन्दर्यात्मकम् मूल्यम् -**

अस्मिन् मूल्ये एकादशमूल्यानि स्थापितानि। यथा – ३७. स्वच्छता, ३८. स्वास्थ्यकरजीवनम्, ३९. शरीरिक श्रमस्य महत्त्वम्, ४०. मित्रता, ४१. जीवेभ्यः, ४२. करुणा, ४३. दयालुता, ४४. ऋजुजीवनम्, ४५. व्यावहारिकता, ४६. पृच्छाभावः, ४७. शुचिता

**३. आर्थिकमूल्यम् -**

अस्मिन् एकमेव मूल्यं स्थापितं तच्च - ४८. साधनसम्पन्ना इत्यस्ति ।

४९. सहिष्णुता, ५०. तत्परता, ५१. आत्मविश्वासः, ५२. कर्तव्यतिष्ठता, ५३. परेषामादारः, ५४. स्वावलम्बनं, ५५. कर्मनिष्ठा, ५६. त्यागभावना, ५७. परगुणप्रशंसा, ५८. सामाजिवीभावना, ५९. मितव्ययीताः, ६०. आवश्यकतानुगुणं संग्रहणम्।

**मूल्यशिक्षाधारित श्लोकाः-**

१. कर्तव्याकर्तव्ययोः भेदः

**कियमे स्वादिदं कृत्वा किन्नमे स्याद् कुर्वतः।**
**इतिकर्माणि सञ्चित्य कुर्याद वा पुरुषो न वा ।।** वि.नी /१/१७
**न कश्चित् सहसाकार्य कार्यं कार्यविदा क्वचित्।**
**क्रियते चेद्विविच्चैव तस्य श्रेयः करस्थितम् ।।**

कवितामृतकूपम् /७४

**२. वृद्धजनसम्मानम्**

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**
**चत्वारितस्यवर्धन्ते आयुर्विद्यायशोबलम् ।।** मनु /७/२२२

**३. कर्तव्यभावना**

**कुर्वन्नेवेह कर्माणि जिगीषिपेच्छतं समाः ।**
**एवं त्वद्विनान्यद्येतोऽस्तिन कर्मलिप्यते नरे।।** यजु /४०/२१.

**४. कृतघ्नता**

**कुतः कृतघ्नस्य दशः कुतः स्थानंकुतः सुखम्।**
**अश्रद्धेयः कृतघ्नोहि, कृतघ्ने नास्ति निष्कृतिः ।।**

**५. समयस्य सदुपयोगः**

**काव्यशास्त्रविनोदेन, कालो गच्छति धीमताम्।**
**व्यसनेन च मूर्खाणां निद्रया कलहेन वा।।** हितो / मित्रलाभं / १

**अध्ययनस्य उद्देश्यानि-**

प्रकृताध्ययने सप्तोद्देश्यानि भवन्ति।

1. मूल्यशिक्षायां शिक्षकाणां सैद्धान्तिक-आर्थिक-सौन्दर्य-सामाजिक-राजनैतिक-धार्मिक-अवधारणायाः तथा शिक्षकाणां मूल्यानां मध्ये सम्बन्धस्य अन्वेषणम्।
2. शिक्षकस्य मूल्यानि एवं मूल्यशिक्षायाः सैद्धान्तिक-आर्थिक-सौन्दर्यात्मक- सामाजिक - राजनीतिक -धार्मिकावधारणायां लिङ्गस्य प्रभावाध्ययनम्।

3.शिक्षकस्य मूल्यानि एवं मूल्यशिक्षायाः सैद्धान्तिक-आर्थिक-सौन्दर्यात्मक-सामाजिक-राजनीतिक-धार्मिकावधारणायां शैक्षिक-योग्यतायाः प्रभावाध्ययनम्।

4.शिक्षकस्य मूल्यानि एवं मूल्यशिक्षायाः सैद्धान्तिक - आर्थिक-सौन्दर्यात्मक-सामाजिक-राजनीतिक-धार्मिकावधारणायां संस्थान-प्रकारस्य प्रभावाध्ययनम्।

5.शिक्षकस्य मूल्यानि एवं मूल्यशिक्षायाः सैद्धान्तिक-आर्थिक-सौन्दर्यात्मक-सामाजिक-राजनीतिक-धार्मिकावधारणायां शिक्षाशास्त्रोपाधेः प्रभावाध्ययनम्।

6.शिक्षकस्य मूल्यानि एवं मूल्यशिक्षायाः सैद्धान्तिक-आर्थिक-सौन्दर्यात्मक-सामाजिक-राजनीतिक-धार्मिकावधारणायां शिक्षणानुभवस्य प्रभावाध्ययनम्।

7.शिक्षकस्य मूल्यानि एवं मूल्यशिक्षायाः सैद्धान्तिक-आर्थिक-सौन्दर्यात्मक-सामाजिक-राजनीतिक-धार्मिकावधारणायां शैक्षणिकप्रवाहस्य प्रभावाध्ययनम्।

**प्राक्कल्पना-**

अनुसन्धानेऽस्मिन् 48 अभावप्राक्कल्पनाः स्वीकृतं वर्तते। अत्र केवलं मुख्यप्राक्कल्पना उल्लिख्यते।

1.मूल्यशिक्षायाः सैद्धान्तिकावधारणाः शिक्षकस्य मूल्यानां च मध्ये कोऽपि सार्थकः सम्बन्धः न स्यात्।

2.मूल्यशिक्षायाः आर्थिकावधारणाः शिक्षकस्य मूल्यानां च मध्ये कोऽपि सार्थकः सम्बन्धः न स्यात्।

3.मूल्यशिक्षायाः सौन्दर्यात्मकावधारणाः शिक्षकस्य मूल्यानां च मध्ये कोऽपि सार्थकः सम्बन्धः न स्यात्।

4.मूल्यशिक्षायाः सामाजिकावधारणाः शिक्षकस्य मूल्यानां च मध्ये कोऽपि सार्थकः सम्बन्धः न स्यात्।

5.मूल्यशिक्षायाः राजनैतिकावधारणाः शिक्षकस्य मूल्यानां च मध्ये कोऽपि सार्थकः सम्बन्धः न स्यात्।

6.मूल्यशिक्षायाः धार्मिकावधारणाः शिक्षकस्य मूल्यानां च मध्ये कोऽपि सार्थकः सम्बन्धः न स्यात्।

7.मूल्यशिक्षायाः विविधावधारणायां (सैद्धान्तिकः, आर्थिकः, सौन्दर्यात्मकः, सामाजिकः, राजनैतिकः, धार्मिकश्च) महिलापुरुष-शिक्षकाणां मध्ये कोऽपि सार्थकः भेदः न स्यात्।

8.मूल्यशिक्षायाः विविधावधारणायां (सैद्धान्तिकः, आर्थिकः, सौन्दर्यात्मकः, सामाजिकः, राजनैतिकः, धार्मिकश्च) शिक्षकस्य शिक्षणानुभवस्य सार्थकः प्रभावः न स्यात् ।

9.मूल्यशिक्षायाः विविधावधारणायां (सैद्धान्तिकः, आर्थिकः, सौन्दर्यात्मकः, सामाजिकः, राजनैतिकः, धार्मिकश्च) शिक्षकस्य शैक्षिकधारायाः कोऽपि सार्थकः प्रभावः न स्यात्।

**विधिः-**

**"त्रिपुराराज्यस्य उच्चमाध्यमिकाध्यापकानां मूल्यशिक्षावधारणायाः सर्वेक्षणात्मकमध्ययनम्"** इति शोधसमस्यायाः अध्ययनाय "सर्वेक्षणविधेः" प्रयोगः विहितः।

**चराः-**

स्वतन्त्रचरत्वेन मूल्यशिक्षाविषयकावधारणा एवं परतन्त्रचरराशित्वेन उच्चमाध्यमिकस्तरीयाध्यापकाः, लिङ्गम्, शिक्षणानुभवः, शैक्षिकयोग्यता, इत्यादयः मध्यवर्तिचरराशयः भवन्ति।

**न्यादर्शः-**

प्रकृतानुसन्धानार्थम् अनुसन्धात्र्या त्रिपुराराज्यस्य धलाई-पश्चिमत्रिपुरा-उनकोटि-सिपाहिजाला-दक्षिणत्रिपुरा-गोमती-खोवाई-उत्तरत्रिपुराजिल्लासु उच्चमाध्यमिकस्तरे एव अध्यापयन्तः 400 अध्यापकाः न्यादर्शरूपेण चिताः। न्यादर्शानां चयनार्थं स्तरीकृत-यादृच्छिकन्यादर्शविधेः (Stratified Random Sampling Technique) प्रयोगः विहितः। न्यादर्शेऽस्मिन् विविधशैक्षिक-धारायुक्ताः, विविधशैक्षिकानुभवयुक्ताः, शिक्षाशास्त्रोपाधिधारकाः अधारकाश्च, महिलाः, पुरुषाश्च उच्चमाध्यमिकाध्यापकाः अन्तर्भाविताः। इत्थं 400 न्यादर्शेभ्यः दत्तांशसङ्ग्रहणं विहितम्। अतः अस्यानुसन्धानस्य कृते स्वीकृतः न्यादर्शः पर्याप्तः भवतीति अभिप्रैमि। एवं स्वीकृतः न्यादर्शः अवश्यमेव उपर्युक्त जनपदाष्टके प्रातिनिध्यं वहतीत्यपि आशासितम् ।

| District | Gender | | Educational Qualification | | Types of Institution | | B.Ed. Program | | Teaching Experience | | | Academic Stream | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | Male | Female | Graduate | Post-Graduate | Govt. | Aided | B.Ed. | Non-B.Ed. | Below 10 Yrs. | 10-20 Yrs. | Above 20 Yrs. | Basic Science | Language | Mathematics | Social Studies |
| DHALAI | 27 | 23 | 24 | 26 | 30 | 20 | 14 | 36 | 14 | 21 | 15 | 9 | 19 | 8 | 14 |
| WEST TRIPURA | 14 | 36 | 17 | 33 | 50 | 0 | 14 | 36 | 14 | 17 | 19 | 15 | 17 | 4 | 14 |
| UNOKOTI | 29 | 21 | 29 | 21 | 41 | 9 | 21 | 29 | 18 | 16 | 16 | 8 | 18 | 7 | 17 |
| SIPAHIJALA | 29 | 21 | 15 | 35 | 46 | 4 | 16 | 34 | 9 | 25 | 16 | 11 | 14 | 7 | 18 |
| SOUTH TRIPURA | 31 | 19 | 20 | 30 | 50 | 0 | 27 | 23 | 31 | 13 | 6 | 10 | 17 | 3 | 20 |
| GOMATI | 25 | 25 | 22 | 28 | 43 | 7 | 20 | 30 | 14 | 19 | 17 | 11 | 15 | 7 | 17 |
| KHOWAI | 35 | 15 | 18 | 32 | 46 | 4 | 36 | 14 | 9 | 24 | 17 | 18 | 18 | 5 | 9 |
| NORTH TRIPURA | 33 | 17 | 7 | 43 | 50 | 0 | 39 | 11 | 8 | 23 | 19 | 8 | 21 | 2 | 19 |
| TOTAL | **223** | **177** | **152** | **248** | **356** | **44** | **187** | **213** | **117** | **158** | **125** | **90** | **139** | **43** | **128** |

**उपकरणानि-**

प्रकृते अनुसन्धाने अनुसन्धात्र्या प्रश्नावलीनामैकमुपकरणं प्रयुक्तमस्ति। उपकरणेऽस्मिन् सैद्धान्तिक-आर्थिक-सौन्दर्यात्मक-सामाजिक-राजनीतिक-धार्मिकावधारणया सम्बन्धाः प्रश्नाः एकांशाः वा आसन्। अस्यां प्रश्नावल्यां षड्-घटकान् आधारीकृत्य पञ्चविंशतिप्रश्नाः आसन्। अनया प्रश्नावल्या समीचीनम् असमीचीनम् इत्याधारेण प्रतिक्रियाः न गृहीताः अपितु केवलं विविधस्थितिषु अध्यापकानां विचारप्रकटनमेव कांक्षितम्। एकस्य प्रश्नस्य षड्-विकल्पाः आसन् यः विकल्पः अधिकतया अभीष्टः तत्र 1 इति देयम्, ततः परं यः विकल्पः अभिष्टः तत्र 2 इति देयम् इत्येवम् आरोहक्रमेण स्वाभिष्टविकल्पस्य पार्श्वे अङ्काः प्रदेयाः आसन्। इयं प्रश्नावली काचित् शिक्षकमूल्याविष्कारिका वर्तते। अस्याः निर्माणं डा. हरभजन. एल्.सिहः एवञ्च डा.एस्.पी.अहलुवालिया महोदयाभ्यां

निर्मीय National Psychological Corporation, Agra द्वारा प्रामाणीकरणमपि कृतं वर्तते।

**अध्ययनप्रक्रिया-**

प्रकृतानुसन्धाने अनुसन्धात्र्या पर्यवेक्षकेन सह चर्चां विधाय समस्येयं अनुसन्धानाय चिता। ततः परं प्रकृतसमस्यासम्बद्धिताः शोधप्रबन्धाः, शोधपत्रिकाः, ग्रन्थाश्च अवलोकिताः। पर्यवेक्षकस्य विभागाध्यक्षाणां प्रशासकानां च अनुमत्या शिक्षकमूल्या-विष्कारिकायाः अभिग्रहणं (Adopt) विहितम्। तदाधारेण विद्यालयेषु गत्वा तत्रत्य अधिकारीणाम् अनुमत्या अध्यापकानां सहयोगेन च प्रश्नावली वितरिता। सर्वाः अपि सूचनाः प्रदाय उच्चमाध्यमिकाध्यापकैः समाधिता प्रश्नावली स्वीकृता। एवं प्रकारेण दत्तांशानां सङ्ग्रहणं विधाय सांख्यकीयविधिभिः दत्ताशांनां विश्लेषणं विहितम्। तदाधारेण प्राप्ताः निष्कर्षाः प्रतिपादिताः।

**दत्तांशस्य विश्लेषणम्-**

वर्णनात्मकसांख्यिक्याः उपयोगः परिमाणात्मकरूपेण संगृहीतदत्तां-शस्य मुख्यविशेषताः संक्षेपेणे प्रस्तुतये एवं तेषां वर्णनाय च क्रियते।

- **मूल्यशिक्षायाः विभिन्नसङ्कल्पनानां शिक्षकानाम् अङ्कस्य वर्णनात्मकसांख्यकी।**

| Concepts of Teacher's Value Education | N | Mean | Median | Mode | SD | Skew | Kurt |
|---|---|---|---|---|---|---|---|
| Theoretical Values | 400 | 89.6 | 90 | 90 | 9.54 | 0.337 | 1.56 |
| Economic Values | 400 | 86.7 | 87 | 90 | 9.05 | -0.211 | 0.005 |
| Aesthetic Values | 400 | 86.7 | 87 | 83 | 10.2 | -0.287 | 1.002 |
| Social Values | 400 | 92.4 | 91 | 93 | 12.23 | 0.502 | 0.384 |
| Political Values | 400 | 83.4 | 84 | 83 | 10.02 | -0.197 | -0.241 |
| Religious Values | 400 | 86.4 | 86 | 86 | 12.25 | 0.314 | 2.215 |

**निष्कर्षः**

मूल्यशिक्षायां शिक्षकाणां सैद्धान्तिकावधारणा एवं शिक्षकमूल्य-योर्मध्ये सकारात्मकः सहसम्बन्धः अनुसन्धात्र्या परिलक्षितः। अस्य अयम् अभिप्रायः यत् मूल्यशिक्षायाः सैद्धान्तिकावधारणायां शिक्षकाः स्वमूल्यानि च सुष्टु अभिजानन्ति। परन्तु आर्थिक-सौन्दर्य-सामाजिक-राजनैतिक-धार्मिक-अवधारणायाः तथा शिक्षकाणां मूल्यानां मध्ये सम्बन्धः तावान् सकारात्मकः न दृष्टः। अर्थात् आर्थिक-सौन्दर्य-सामाजिक-राजनैतिक-धार्मिक-अवधारणाविषये शिक्षकाणाम् अभि-ज्ञाने न्यूनता वर्तते। मूल्यशिक्षायाः सौन्दर्यात्मक-सामाजिक-धार्मिकावधारणायां महिलापुरुषशिक्षकयोर्मध्ये भेदः नास्ति। मूल्यशिक्षायाः सौन्दर्यात्मक-सामाजिक- धार्मिकावधारणायां लिङ्ग-दृष्ट्या त्रिपुराराज्यस्य उच्चमाध्यमिकशिक्षकेषु भेदः न वर्तते। परन्तु मूल्यशिक्षायाः सैद्धान्तिक-आर्थिक-राजनैतिकावधारणां महिलापुरुष-शिक्षकयोर्मध्ये भेदः वर्तते। त्रिपुराराज्यस्य उच्चमाध्यमिकशिक्षकाणां मूल्यशिक्षायाः सामाजिक-राजनीतिकावधारणायां शैक्षिकयोग्य-ताधारेण भेदः दृष्टः। परन्तु सैद्धान्तिक- आर्थिक-सौन्दर्यात्मक-धार्मिकावधारणायां शैक्षिकयोग्यताधारेण भेदः न वर्तते। त्रिपुराराज्यस्य उच्चमाध्यमिकशिक्षकाणां मूल्यशिक्षायाः आर्थिक-सौन्दर्यात्मक-सामाजिक-राजनीतिक- धार्मिकावधारणायां संस्थान-प्रकाराधारेण अभिवृत्तौ भेदः दृष्टः। मूल्यशिक्षायाः सैद्धान्तिक-राजनैतिकावधारणायां संस्थानप्रकाराधारेण अभिवृत्तौ भेदः न दृष्टः। त्रिपुराराज्यस्य उच्चमाध्यमिकशिक्षकाणां मूल्यशिक्षायाः सैद्धान्तिक-सौन्दर्यात्मक-सामाजिक-राजनैतिकावधारणायाः विषये शिक्षाशा-स्त्र्युपाधिदृष्ट्या अभिवृत्तौ भेदः वर्तते। परन्तु मूल्यशिक्षायाः आर्थिक-धार्मिकावधारणायाः विषये शिक्षाशास्त्र्युपाधिदृष्ट्या अभिवृत्तौ भेदः नास्ति। त्रिपुराराज्यस्य उच्चमाध्यमिकशिक्षकाणां मूल्यशिक्षायाः सैद्धान्तिक-आर्थिक-सौन्दर्यात्मक-सामाजिक-राजनीतिक-धार्मिकाव-धारणायां शिक्षणानुभवस्य प्रभावः नास्ति। सर्वेषां शिक्षकानाम् मूल्यशिक्षायाः अवधारणायाविषये अभिवृत्तौः शिक्षणानुभवः प्रभावं न जनयति। त्रिपुराराज्यस्य उच्चमाध्यमिकशिक्षकाणां मूल्यशिक्षायाः सैद्धान्तिक-आर्थिक-राजनीतिक-धार्मिकावधारणां शैक्षणिकप्रवाहः न प्रभवयति, परन्तु सौन्दर्यात्मक-सामाजिकावधारणां शैक्षणिकप्रवाहः प्रभावयति। तथा च केषुचित् घटकेषु लिङ्गभेदेन, संस्थायाः प्रकारभेदेन, उपाधिभेदेन, शैक्षणिकप्रवाहभेदेन भेदः दृष्टः केषुचित् भेदः न परिलक्षितः। परन्तु शिक्षणानुभवस्य आधारेण मूल्यशिक्षायाः अवधारणायां कोऽपि प्रभावः न परिलक्षितः। त्रिपुराराज्यस्य उच्चमाध्यमिकशिक्षकाणां मूल्यशिक्षायाः सैन्दान्तिक-सौन्दर्यात्मक-राजनैतिकावधारणायां भेदः नास्ति। अन्येषु सामाजिक-आर्थिक-धार्मिकघटकेषु मूल्यशिक्षायाः अवधारणायां भेदः वर्तते। अतः घटकाधारेण मूल्यशिक्षायाः अवधारणायां भेदः केषुचित् परिलक्षितः केषुचित् भेदः न दृष्टः।